ॐ श्री शिवगुरुभ्यो नमः ॐ

श्रीविद्यागुरुराजैःश्रीमत् परमहंसपरिव्राजकैः

परमगुरुभिःश्रीप्रकाशानन्दनाथ महास्वाभिः

प्रकाशितोऽयं श्रीबोधायनोक्त महान्यास सहित

शिवपूजा सूत्रानुसारी

॥ महा न्यासम् ॥ ॥ ॐ नमः शिवाय ॥

गणानां त्वा गणपतिꣳहवामहे कविं

कवीनां उपमश्रवस्तमम् ।

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनःश्रुण्वन्नूतिभिः

सीद सादनम् ॥ ॐ महा-गणपतये नमः ॥

॥ पञ्चाङ्गरुद्र न्यासः ॥





अथ पञ्चाङ्गरुद्राणां न्यासपूर्वकं

जपहोमार्चनाभिषेक विधिं व्याख्यास्यामः ॥

॥ शिखाद्यस्त्रान्तं एकत्रिंशदङ्ग न्यासः प्रथमः ॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।

तया नस्तनुवा शन्तम या गिरिशन्ता

भिचाकशीहि ॥ शिखायै नमः ॥१

अस्मिन् महत्यर्णवेऽ न्तरिक्षे भवा अधि ।

तेषाꣳसहस्र-योजनेऽ वधन्वानि तन्मसि ॥

शिरसे नमः ॥२

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।

तषोꣳसहस्र-याजे नेऽवधन्वानि तन्मसि ॥

ललाटाय नमः ॥३

हꣳसश्शुचिष -द्वसुरन्तरिक्ष सद्धोतावेदिष-
दतिथिर्दुरोणसत् ।
नषृद्वरसदृतसद्व्योम सदब्जा गोजा ऋतजा
अद्रिजा ऋतं बृहत् ॥ भ्रुवोर्मध्याय नमः ॥४
त्र्यबंकं यजामहे सुगन्धिं पुष्टिवधर्नम् ।
उर्वारुकमिव बन्धनान्- मृत्योर्मुक्षीय
माऽमतृात् ॥ नेत्राभ्यां नमः ॥५
नमःस्रुत्याय च पथ्याय च ॥ कर्णाभ्यां नमः ॥६
मानस्तोके तनये मा न आयुषि मा नो गोषु
मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्रभामितो
ऽवधी-र्हविष्मन्तो नमसा विधमे ते ॥
नासिकायै नमः ॥७



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

अवतत्य धनुस्त्वꣳसहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥
मुखाय नमः ॥८
नीलग्रीवाश्शितिकण्ठा श्शर्वा अधः क्षमाचराः ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
नीलग्रीवाश्शितिकण्ठा दिवꣳरुद्रा उपश्रिताः ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥
कण्ठाय नमः ॥९
नमस्ते अस्त्वायुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥
बाहुभ्यां नमः ॥१०
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।

तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ॥

उपबाहुभ्यां नमः ॥११

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ।

तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि ॥

हस्ताभ्यां नमः ॥१२

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः

। भवे भवे नातिभवे भवस्व मां ।

भवोद्भवाय नमः ॥ अङ्गुष्ठाभ्यां नमः ॥१३

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो

रुद्राय नमः कालाय नमः

कलविकरणाय नमो बलविकरणाय नमो बलाय

नमो बलप्रमथनाय नमः





सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

तर्जनीभ्यां नमः ॥१४

अघोरेभ्योऽथघोरेभ्यो घोर घोरतरेभ्यः ।

सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु

रुद्ररूपेभ्यः ॥ मध्यमाभ्यां नमः ॥१५

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो

रुद्रः प्रचोदयात् ॥ अनामिकाभ्यां नमः ॥१६

ईशानः सर्व विद्यान मीश्वरः सर्व भूतानां

ब्रह्माधिपति र्ब्रह्मणोऽधिपति र्ब्रह्मा शिवो मे

अस्तु सदाशिवोम् ॥ कनिष्ठिकाभ्यां नमः ॥१७

नमो वः किरिकेभ्यो देवानाँ हृदयेभ्यः ॥

हृदयाय नमः ॥१८

नमो गणेभ्यो गणपतिभ्यश्च वो नमः॥ पृष्ठाय नमः ॥१९

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः ॥ पार्श्वाभ्यां नमः ॥२०

हिरण्यगर्भस्समवर्त ताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ नाभ्यै नमः ॥२१

मीढुष्टम शिवतम शिवोनस्सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥ कण्ठ्यै नमः ॥२२

ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥





गुह्याय नमः ॥२३

जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देविꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः॥ अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥ विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरिताऽतिपर्षि। अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्॥ पृतना जितꣳ सहमानमुग्रमग्निꣳ

हुवेम परमाथ्सधस्थात्। स नः पर्षदति दुर्गाणि

विश्वा क्षामद्देवो अति दुरितात्यग्निः॥

अपानाय नमः॥२४

मानो महान्तमुत मानो अर्भकं मा न उक्षन्तमुत

मा न उक्षितम् । मा नो वधीः पितरं मोत मातरं

प्रिया मा नस्तनु वो रुद्र रीरिषः॥

ऊरुभ्यां नमः॥२५

एष ते रुद्रभागस्तञ्जुषस्व तेनावसेन परोमूजवतो

ऽतीह्यवततधन्वा पिनाकहस्तःकृत्तिवासाः॥

जानुभ्यां नमः॥२६

ये पथां पथिरक्षय ऐलबृदा यव्युधः।तेषाꣳसहस्र

योजनेऽवधन्वानि तन्मसि॥ पादाभ्यांनमः॥२७



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।

अहीꣳश्च सर्वान्जम्भयन् सर्वाश्च यातुधान्यः ॥

कवचाय हुम्॥२८

नमो बिल्मिने च कवचिने च॥

उप कवचाय हुम्॥२९

नमो अस्तु नीलग्रीवाय सहस्राक्षायमीढुषे ।

अथो ये अस्य सत्वानोऽहन्तेभ्यो करन्नमः ॥

तृतीय नेत्रत्रयाय वौषट्॥३०

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् ।

याश्चते हस्त इषवः परा ता भगवो वप॥

अस्त्राय फट्॥३१

य एतावन्तश्च भूयाꣳसश्चदिशो रुद्रा वितस्थिरे।

तेषा॑ꣳसहस्रयोजनेऽवधन्वा॑नि तन्मसि ॥

इति दिग्बन्धः॥ ३२

॥ अथमूर्धादि पादान्तं दशाङ्ग न्यासोद्वितीयः॥

ॐ नमो भगवते॑ रुद्राय ॥

ॐ मूर्ध्ने नमः। नं नासिकायै नमः।

मों ललाटाय नमः। भं मुखाय नमः।

गं कण्ठाय नमः। वं हृदयाय नमः।

तें दक्षिणहस्ताय नमः। रुं वामहस्ताय नमः।

द्रां नाभ्यै नमः। यं पादाभ्यां नमः॥

॥ अथपादादि मूर्धातं पञ्चाङ्ग न्यासस्तृतीयः॥

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः

। भवे भवे नातिभवे भवस्व मां ।





भवोद्भवाय नमः ॥ पादाभ्यां नमः॥१

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो

रुद्राय नमः कालाय नमः कलविकरणाय नमो

बलविकरणाय नमो बलाय नमो बलप्रमथनाय

नमःसर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

ऊरु मध्याभ्यां नमः॥२

अघोरेभ्योऽथघोरेभ्यो घोर घोरतरेभ्यः।

सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तुरुद्ररूपेभ्यः॥

हृदयाय नमः ॥३

तत्पुरुषाय विद्महे महादेवाय धीमहि ।

तन्नो रुद्रः प्रचोदयात्॥ मुखाय नमः॥४

ईशानः सर्व विद्यान मीश्वरः सर्व भूतानां

ब्रह्माधिपति ब्रह्मणोऽधिपति ब्रह्मा शिवो मे

अस्तु सदाशिवोम्॥ मूर्ध्ने नमः ॥५

॥ हंस हंसः ॥

॥ दिक्सम्पुट न्यासः ॥

ॐ भूर्भुवस्सुवरोम्। लं। त्रातारमिन्द्र

मवितारमिन्द्रꣳहवे हवे सुहवꣳशूरमिन्द्रं।

हुवेनु शक्रं पुरुहूतमिन्द्रꣳस्वस्ति नो मघवा

धात्विन्द्रः॥ लं इन्द्राय नमः ॥१

ॐ भूर्भुवस्सुवरोम्। रं। त्वन्नो अग्ने वरुणस्य

विद्वान् देवस्य हेडोऽव यासिसीष्ठाः। यजिष्ठो





वह्नितमश्शोशुचानो विश्वाद्वेषाꣳसि

प्रमुमुग्ध्यस्मत् ॥ रं अग्नये नमः ॥२

ॐ भूर्भुवस्सुवरोम्। हं। सुगन्नःपन्थामभयं

कृणोतु । यस्मिन्नक्षत्रे यम एति राजा।

यस्मिन्नेनमभ्यषिञ्चन्त देवाः। तदस्य

चित्रꣳहविषा यजाम॥ हं यमाय नमः ॥३

ॐ भूर्भुवस्सुवरोम्। षं। असुन्वन्तम

यजमानमिच्छस्तेनस्येत्यान्तस्करस्यान्वेषि।

अन्यमस्मदिच्छ सा त इत्या नमो देवि निरृते

तुभ्यमस्तु॥ षं निरृतये नमः ॥४

ॐ भूर्भुवस्सुवरोम्। वं। तत्वायामि ब्रह्मणा

वन्दमानस्तदा शास्ते यजमानो हविर्भिः।

अहेडमानो वरुणेहबोध्युरुशꣳसमान आयुः

प्रमोषीः ॥ वं वरुणाय नमः ॥५

ॐ भूर्भुवस्सुवरोम् । यं । आ नो नियुद्भिश्शति

नीभिरध्वरं । सहस्त्रिणीभिरुपयाहि यज्ञं ।

वायो अस्मिन् हविषि मादयस्व । यूयं पात

स्वस्तिभिस्सदा नः ॥ यं वायवे नमः ॥६

ॐ भूर्भुवस्सुवरोम् । सं । वयꣳसोम व्रते तव ।

मनस्तनूषु बिभ्रतः । प्रजावन्तो अशीमहि ॥ सं

सोमाय नमः ॥७

ॐ भूर्भुवस्सुवरोम् । शं । तमीशानं

जगतस्तस्थुषस्पतिं । धियं जिन्वमवसे



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

हूमहे वयं । पूषा नो यथा वेदसामसद्वृधे ।

रक्षिता पायु रदब्धस्स्वस्तये ॥ शं ईशानाय

नमः ॥८

ॐ भूर्भुवस्सुवरोम् । खं । अस्मे रुद्रा मेहना

पर्वतासो वृत्रहत्ये भर हूतौ सजोषाः ।

यश्शंसते स्तुवते धायि पज्र इन्द्र ज्येष्ठा अस्मां

अवन्तु देवाः ॥ खं ब्रह्मणे नमः ॥९

ॐ भूर्भुवस्सुवरोम् । ह्रीं । स्योना पृथिवि भवा

नृक्षरा निवेशनी । यच्छा नश्शर्म सप्रथाः ॥

॥ ह्रीं विष्णवे नमः ॥१०

त्वगस्थिगतैः सर्वपापैः प्रमुच्यते । सर्व

भूतेष्वपराजितो भवति । ततो भूत प्रेत पिशाच

ब्रह्मराक्षस यक्ष यमदूतशाकिनीडाकिनी

सर्पश्वापद तस्करा द्युपद्रवाद्युपघाताः

सर्वेज्वलन्तं पश्यन्तु। मां रक्षन्तु ॥

॥ गह्यादि मस्तकान्तं पञ्चाङ्ग न्यासश्चतुर्थः ॥

मनो ज्योतिर्जुषता माज्यं विच्छिन्नं यज्ञꣳसमिमं

दधातु। या इष्टा उषसो निम्रुचश्च तास्सन्दधामि

हविषा घृतेन ॥ गुह्याय नमः ॥१

अबोध्यग्निस्समिधा जनानां प्रति धेनुमिवायती

मुषासं। यह्वा इव प्रवयामुज्जिहानाः

प्रभानवस्सिस्रतेनाकमच्छ ॥ नाभ्यै नमः ॥२





मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय

जातमग्निं । कविꣳसम्राजमतिथिं जनानामासन्ना

पात्रं जनयन्त देवाः॥ हृदयाय नमः ॥३

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा

राजाऽमृतेनाभिवस्तां। उरोर्वरीयो वरिवस्ते

अस्तु जयन्तं त्वा मनुमदन्तु देवाः॥ मुखाय

नमः ॥४

जातवेदा यदि वा पावकोऽसि। वैश्वानरो यदि

वा वैद्युतोऽसि। शंप्रजाभ्यो यजमानाय लोकं।

ऊर्जं पुष्टिं दददभ्याववृत्स्व। शिरसे नमः ॥५

॥ अथहृदयादि अस्त्रान्तं पञ्चाङ्ग न्यासःपञ्चमः॥

॥ शिवसङ्कल्पः ॥

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिव
सङ्कल्पमस्तु ॥
येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति
विदथेषु धीराः। यदपूर्वं यक्षमन्तः प्रजानां तन्मे
मनः शिव सङ्कल्पमस्तु ॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं
प्रजासु। यस्मान्नऋते किञ्चन कर्म क्रियते तन्मे
मनः शिव सङ्कल्पमस्तु ॥
येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन
सर्वं। येन यज्ञस्तायते सप्तहोता तन्मे मनः शिव
सङ्कल्पमस्तु ॥



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

यस्मिन्नृचः सामयजूꣳषि यस्मिन्प्रतिष्ठिता
रथनाभाविवाराः। यस्मिꣳश्चित्तꣳ
सर्वमोतंप्रजानां तन्मे मनः शिव सङ्कल्पमस्तु ॥
सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेऽभीशुभि
र्वाजिन इव। हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे
मनः शिव सङ्कल्पमस्तु ॥ हृदयाय नमः ॥१

॥ पुरुष सूक्तम् ॥

सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्।
पुरुष एवेदꣳ सर्वम्। यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानः। यदन्नेनातिरोहति।
एतावानस्य महिमा। अतो ज्यायाꣳश्च पूरुषः।

पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि।

त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभवात्पुनः।

ततो विष्वङ्व्यक्रामत्। साशनानशने अभि।

तस्माद्विराडजायत। विराजो अधि पूरुषः।

स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः।

यत्पुरुषेण हविषा। देवा यज्ञमतन्वत।

वसन्तो अस्यासीदाज्यम्। ग्रीष्म

इध्मश्शरद्धविः। सप्तास्यासन्परिधयः।

त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः।

अबध्नन्पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्।

पुरुषं जातमग्रतः। तेन देवा अयजन्त।

साध्या ऋषयश्च ये।





तस्माद्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम्।

पशूꣳस्ताꣳश्चक्रे वायव्यान्।

आरण्यान्ग्राम्याश्च ये।

तस्माद्यज्ञात्सर्वहुतः। ऋचः सामानि जज्ञिरे।

छन्दाꣳसि जज्ञिरे तस्मात्।यजुस्तस्मादजायत।

तस्मादश्वा अजायन्त। ये के चोभयादतः।

गावो ह जज्ञिरे तस्मात्। तस्माज्जाता

अजावयः।

यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्।

मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते।

ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः।

ऊरू तदस्य यद्वैश्यः। पद्भ्याꣳ शूद्रो अजायत।

चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत।
नाभ्या आसीदन्तरिक्षम्।
शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकाꣳ
अकल्पयन्।
वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं
तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः।
नामानि कृत्वाऽभिवदन्यदास्ते। धाता
पुरस्ताद्यमुदाजहार। शक्रः
प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह
भवति। नान्यः पन्था अयनाय विद्यते।





यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि
प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते।
यत्र पूर्वे साध्याः सन्ति देवाः॥

॥ शिरसे स्वाहा ॥२

॥ उत्तरनारायणम्॥

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः
समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति।
तत्पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं
महान्तम्। आदित्यवर्णं तमसः परस्तात्।
तमेवं विद्वानमृत इह भवति। नान्यः पन्था
विद्यतेयऽनाय। प्रजापतिश्चरति गर्भे अन्तः।
अजायमनो बहुधा विजायते। तस्य धीराः

परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेदसः॥ यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मम् जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन् वशे। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण॥ ॥ शिखायै वषट॥३

॥ अप्रतिरथम् कवचम् ॥



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

आशुश्शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिष एकवीरश्शतꣳसेना अजयत्साकमिन्द्रः॥ संक्रन्दनेनाऽनिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तत्सहध्वं युधो नर इषु हस्तेन वृष्णा॥ स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा सयुध इन्द्रो गणेन। सꣳसृष्टजित्सोमपा बाहुशर्द्ध्यूर्द्ध्वधन्वा प्रतिहिताभिरस्ता॥ बृहस्पते परिदीया रथेन रक्षोहाऽमित्राꣳ अपबाधमानः। प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेद्ध्यविता रथानाम्॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म
प्रमृणन्तमोजसा । इमꣳसजाता अनुवीरयध्व
मिन्द्रꣳसखायोऽनु सꣳरभध्वम् ॥ बलविज्ञाय
स्स्थविरः प्रवीरस्सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र
रथमातिष्ठ गोवित् ॥ अभिगोत्राणि सहसा
गाहमानोऽदायो वीरश्शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳसेना अवतु
प्रयुत्सु ॥इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः
पुर एतु सोमः । देवसेनानामभिभंजतीनां
जयन्तीनां मरुतो यन्त्वग्रे ॥ इन्द्रस्य वृष्णो
वरुणस्य राज्ञ आदित्यानां मरुताꣳशर्द्ध उग्रम् ।





महामनसां भुवनच्य वानां घोषो देवानां
जयतामुदस्थात् ॥ अस्माकमिन्द्रस्समृतेषु
ध्वजेष्वस्माकं या इषवस्ता जयन्तु । अस्माकं
वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु ॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां
महाꣳसि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां
जयतामेतु घोषः ॥ उपप्रेत जयता
नरस्स्थिरावस्सन्तु बाहवः । इन्द्रो वश्शर्म
यच्छत्वनाधृष्या यथाऽसथ ॥ अवसृष्टा परापत
शरव्ये ब्रह्म सꣳशिता । गच्छामित्रान् प्रविश
मैषां कंचनोच्छिषः ॥ मर्माणि ते वर्मभिश्
छादयामि सोमस्त्वा राजाऽमृतेनाभिवस्ताम् ।

उरार्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु
मदन्तु देवाः ॥ यत्र बाणास्संपतन्ति कुमारा
विशिखा इव । इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म
यच्छतु ॥ ॥ कवचाय हुम् ॥४

॥ त्वमग्नेरुद्रमित्यनुवाकः ॥

त्वमग्ने रुद्रोअसुरो महो दिवः । त्वꣳशर्द्धो
मारुतं पृक्ष ईशिषे । त्वं वातैररुणैर्यासिशङ्गयः ।
त्वं पूषा विधतः पासि नुत्मना । देवा देवेषु
श्रयध्वम् । प्रथमाद्वितीयेषु श्रयध्वम् ।
द्वितीयास्तृतीयेषु श्रयध्वम् । तृतीयाश्चतुर्थेषु
श्रयध्वम् । चतुर्थाःपञ्चमेषु श्रयध्वम् । पञ्चमाः
षष्ठेषु श्रयध्वम् । षष्ठाःसप्तमेषु श्रयध्वम् । सप्तमा





अष्टमेषु श्रयध्वम् । अष्टमा नवमेषु श्रयध्वम् ।
नवमा दशमेषु श्रयध्वम् । दशमा एकादशेषु
श्रयध्वम् । एकादशा द्वादशेषु श्रयध्वम् ।
द्वादशास्त्रयोदशेषु श्रयध्वम् । त्रयोदशाश्चतुर्दशेषु
श्रयध्वम् । चतुर्दशाःपञ्चदशेषु श्रयध्वम् ।
पञ्चदशाःषोडशेषु श्रयध्वम् । षोडशाः सप्तदशेषु
श्रयध्वम् । सप्तदशा अष्टादशेषु श्रयध्वम् ।
अष्टादशा एकान्नविꣳशेषु श्रयध्वम् ।
एकान्नविꣳशा विꣳशेषु श्रयध्वम् । विꣳशा
एकविꣳशेषु श्रयध्वम् । एकविꣳशाद्वाविꣳशेषु
श्रयध्वम् । द्वाविꣳशास्त्रयोविꣳशेषु श्रयध्वम् ।
त्रयोविꣳशाश्चतुर्विꣳशेषु श्रयध्वम् । चतुर्विꣳशाः

पञ्चविꣳशेषु श्रयध्वम्। पञ्चविꣳशाष्षड्विꣳशेषु
श्रयध्वम्। षड्विꣳशास्सप्तविꣳशेषु श्रयध्वम्।
सप्तविꣳशा अष्टाविꣳशेषु श्रयध्वम्।
अष्टाविꣳशा एकान्नत्रिꣳशेषु श्रयध्वम्।
एकान्नत्रिꣳशास्त्रिꣳशेषु श्रयध्वम्। त्रिꣳशा
एकत्रिꣳशेषु श्रयध्वम्। एकत्रिꣳशा द्वात्रिꣳशेषु
श्रयध्वम्। द्वात्रिꣳशास्त्रयस्त्रिꣳशेषु श्रयध्वम्।
देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिꣳशाः। उत्तरे भवत।
उत्तर वर्त्मान उत्तर सत्वानः। यत्काम इदं
जुहोमि। तन्मे समृद्ध्यताम्। वयꣳस्याम पतयो
रयीणाम्। भूर्भुवस्स्वस्स्वाहा॥ अस्त्राय फट्॥५

॥ भूर्भुवस्सुवरों इति दिग्बन्धः॥





॥ पञ्चाङ्ग जपः॥

हꣳसश्शुचिष -द्वसुरन्तरिक्ष सद्धोतावेदिष-
दतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योम सदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत्॥

प्रतद्विष्णुस्तवते वीर्याय। मृगोनभीमः
कुचरोगिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु।
अधिक्षियन्तिभुवनानि विश्वा॥

त्र्यबंकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय
माऽमतृात्॥
तत्सवितुर्वृणीमहे। वयं देवस्य भोजनम्।
श्रेष्ठꣳसर्वधातमम्। तुरं भगस्य धीमहि॥
विष्णुर्योनिं कल्पयतु। त्वष्टा रूपाणि पिꣳशतु।
आसिञ्चतु प्रजापतिः। धाता गर्भं दधातु ते॥

॥ अष्टाङ्ग नमस्कारः॥

हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातःपतिरेक
आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै
देवाय हविषा विधेम ॥

॥ॐ नमःशिवायैश्शिवाय नमः॥



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो
बभूव। य ईशे अस्य द्विपदश्चतुष्पदःकस्मै देवाय
हविषा विधेम॥ ॐ नमःशिवायैश्शिवाय नमः॥
ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन
आवः। सबुध्निया उपमा अस्य विष्ठास्सतश्च
योनिमसतश्च विवः॥

॥ ॐ नमःशिवायैश्शिवाय नमः॥

महीद्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्।
पिपृतान्नो भरीमभिः॥

॥ ॐ नमःशिवायैश्शिवाय नमः॥

उपश्वासय पृथिवीमुतद्यां पुरुत्रा ते मनुतां विष्ठितं जगत्। स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अपसेध शत्रून्॥ॐ नमःशिवायैश्शिवाय नमः॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम॥

॥ॐ नमःशिवायैश्शिवाय नमः॥

या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा॥ॐ नमःशिवायैश्शिवाय नमः॥

इमं यम प्रस्तरमाहि सीदाङ्गिरोभिः पितृभिस्संविदानः। आत्वा मन्त्राः कविशस्ता





वहन्त्वेना राजन् हविषा मादयस्व॥

॥ॐ नमःशिवायैश्शिवाय नमः॥

॥ लघु न्यासः॥ ॥ अथ ध्यानम् ॥

॥अथात्मानं शिवात्मानं श्रीरुद्ररूपं ध्यायेत् ॥

शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम्।
गङ्गाधरं दशभुजं सर्वाभरणभूषितम्॥

नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् ।
नागाभरणभूषाढ्यं व्याघ्रचर्मोत्तरीयकम् ॥
कमण्डल्वक्षसूत्रञ्च अभयञ्च वरप्रदम् ।
शूलहस्तं कपिलजटिं शिखामध्योद्धारिणम् ॥
वषृस्कन्ध समारूढं उमादेहार्ध धारिणम् ।
अमृतेनाप्लुतं हृष्टं दिव्यभागे समन्वितम् ॥
दिग्देवता समायुक्तं सुरासुर नमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥
सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ।
एवं ध्यात्वा द्विजस्सम्यक् ततो यजनमारभेत् ॥

॥ अथ प्रजननादि सर्वाङ्ग न्यासः षष्ठमः ॥

प्रजनने ब्रह्मा तिष्ठतु । पादयोर्विष्णुस्तिष्ठतु ।



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

हस्तयोर्हरस्तिष्ठतु । बाह्वोरिन्द्रस्तिष्ठतु । जठरेऽग्निस्तिष्ठतु । हृदये शिवस्तिष्ठतु । कण्ठे वसवस्तिष्ठन्तु । वक्त्रे सरस्वती तिष्ठतु । नासिकयोर्वायुस्तिष्ठतु । नयनयोश्चन्द्रादित्यौ तिष्ठेतां । कर्णयोरश्विनौ तिष्ठेतां । ललाटे रुद्रास्तिष्ठन्तु । मूर्ध्न्यादित्यास्तिष्ठन्तु । शिरसि महादेवस्तिष्ठतु । शिखायां वामदेवस्तिष्ठतु । पृष्ठे पिनाकी तिष्ठतु । पुरतः शूली तिष्ठतु । पार्श्वयोः शिवाशङ्करौ तिष्ठेतां । सर्वतो वायुस्तिष्ठतु । ततो बहिः सर्वतोऽग्निर्ज्वालामाला-परिवृतस्तिष्ठन्तु । सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु । मां रक्षन्तु ॥

अग्निर्मे वाचि श्रितः। वाग्घृदये। हृदयं मयि।
अहममृते। अमृतं ब्रह्मणि। वायुर्मे प्राणे श्रितः
। प्राणो हृदये। हृदयं मयि। अहममृते। अमृतं
ब्रह्मणि। सूर्यो मे चक्षुशि श्रितः। चक्षुर्हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।
चन्द्रमा मे मनसि श्रितः। मनो हृदये। हृदयं
मयि। अहममृते। अमृतं ब्रह्मणि।दिशो मे श्रोत्रे
श्रिताः। श्रोत्रꣳहृदये। हृदयं मयि। अहममृते।
अमृतं ब्रह्मणि। आपो मे रेतसि श्रिताः। रेतो
हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।
पृथिवि मे शरीरे श्रिताः। शरीरꣳ हृदये। हृदयं
मयि। अहममृते। अमृतं ब्रह्मणि।





ओषधिवनस्पथयो मे लोमसु श्रिताः। लोमानि
हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।
इन्द्रो मे बले श्रितः। बलꣳ हृदये। हृदयं मयि।
अहममृते। अमृतं ब्रह्मणि। पर्जन्यो मे मूर्ध्नि
श्रितः। मूर्धा हृदये। हृदयं मयि। अहममृते।
अमृतं ब्रह्मणि। इशानो मे मन्यौ श्रितः।
मन्युःर्हृदये। हृदयं मयि। अहममृते।
अमृतं ब्रह्मणि। आत्मा म आतमनि श्रितः।
आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं
ब्रह्मणि। पुनर्म आत्मा पुनरायुरागात्। पुनः
प्राणः पुनराकूतमागात्। वैश्वनरो
रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य

गोपाः ॥

आराधितो मनुष्यैस्त्वं सिद्धैर्देवैस्सुरादिभिः ।

आराधयामि भक्त्या त्वामनुग्रहाण महेश्वर ॥

हृदये आवाहनम्

आत्वावहन्तु हरयस्सचेतसः

श्वेतैरश्वैस्सहकेतुमद्भिः ।

वाताजितैर्बलवद्भिर्मनोजवैरायाहिशिघ्रं

मम हव्याय शर्वोम् ॥

॥ मम हृदये श्रीसाम्बपरमेश्वरं ध्यायामि

आवाहयामि समस्तोपचारान् समर्पयामि ॥

आयुराशास्ते । सुप्रजास्त्वमाशास्ते ।

सजातवनस्यामाशास्ते । उत्तरान्देव





यज्यामाशास्ते । भूयो हविष्करणमाशास्ते ।

दिव्यम्धामाशास्ते । विश्वं प्रियमाशास्ते । भूयो

हविष्करणमाशास्ते । दिव्यन्धामाशास्ते ॥

विशम् प्रियाशामास्ते । यदनेन हविषामाशास्ते ।

तदस्यात्तदृद्ध्यात् । तदस्मै देवारासन्ताम् ।

तदग्निर्देवो देवेभ्यो वनते । वयमग्नेर्मानुषाः । इष्टं

च वीतं च । उभे च नो द्यावापृथिवी

अꣳहसस्पाताम् । इहगतिर्वामस्येदं च ।

नमो देवेभ्यः ॥

॥ हर हर नमःपार्वतीपतये । हर हर महादेव ॥

अस्य श्री रुद्राध्यायप्रश्नमहामन्त्रस्य अघोर

ऋषिः,अनुष्टुप् चन्दः, सङ्कर्षणमूर्तिस्वरूपो

योऽसावादित्यः परमपुरुषः स एष रुद्रो देवता।

नमः शिवायेति बीजम्। शिवतरायेति शक्तिः।

महादेवायेति कीलकं। श्री साम्बसदाशिव-

प्रसादसिद्ध्यर्थे जपे विनियोगः॥

अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः।

दर्शपूर्णमासात्मने तर्जनीभ्याम् नमः।

चातुर्मास्यात्मने मध्यमाभ्याम् नमः।

निरूढपशुबन्धात्मने अनामिकाभ्यां नमः।





ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः।

सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः॥

अग्निहोत्रात्मने हृदयाय नमः।

दर्शपूर्णमासात्मने शिरसे स्वाहा।

चातुर्मास्यात्मने शिखायै वषट्।

निरूढपशुबन्धात्मने कवचाय हुं।

ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट्।

सर्वक्रत्वात्मने अस्त्राय फट्।

भूर्भुवस्सुवरोमिति दिग्बन्धः॥ ॥ ध्यानं॥

आपाताळनभःस्थलान्तभुवनब्रह्माण्डमाविस्फुर

ज्ज्योतिःस्फाटिक लिङ्ग मौळिविलसत्पूर्णेन्दु

वान्तामृतैः।

अस्तोकाप्लुतमेकमीश मनिशंरुद्रानुवाकाञ्जपन्

ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोऽभिषिञ्चे

च्छिवम् ॥

ब्रह्माण्डव्याप्तदेहा भसित हिमरुचा भासमाना

भुजङ्गैः

कण्ठे कालाः कपर्दाकलित-शशिकला-

श्चण्डकोदण्डहस्ताः ॥

त्र्यक्षा रुद्राक्षमाला प्रकटितविभवाः शांभवा

मूर्तिभेदा रुद्राः श्रीरुद्रसूक्त-प्रकटितविभवाः नः

प्रयच्छन्तु सौख्यम् ॥

लं पृथिव्यात्मने गन्धं समर्पयामि । हं

आकाशात्मने पुष्पाणि समर्पयामि ।



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

यं वाय्वात्मने धूपं आघ्रापयामि । रं अग्न्यात्मने

दीपं दर्शयामि । वं अमृतात्मने अमृतं

निवेदयामि । सं सर्वात्मने समस्तोपचारान्

समर्पयामि ॥

ओं गणानान्त्वा गणपतिꣳ हवामहे कविं

कवीनामुपमश्रवस्तमं । ज्येष्ठ राजं ब्रह्मणां

ब्रह्मणस्पत आ नःशृण्वन्नूतिभिस्सीदसादनं ॥

ॐ श्री महागणपतये नमः ॥ ॥ शान्ति पठः ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे

कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे

वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे

यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं

च मे महश्च मे संविश्च मे ज्ञात्रं च मे सूश्च मे
प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं
च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे
दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च
मे शयनं च मे सूषा च मे सुदिनं च मे॥ ॐ
शान्तिः शान्तिः शान्तिः॥

श्रीगुरु स्तुति

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे
विद्यावतार संसिद्ध्यै स्वीकृतानेकविग्रह
नवाय नवरूपाय परमार्थस्वरूपिणे
सर्वाज्ञानतमोभेद भानवे चिद् घनाय ते
स्वतन्त्राय दयाक्लृप्त विग्रहाय शिवात्मने





परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम्
प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्याम्युपर्यधः
सदा मच्चित्तरूपेण विधेहि भवदासनम्
त्वत्प्रसादादहं देव कृतकृत्योस्मि सर्वदा
माय मृत्यु महापाशात् विमुक्तोस्मि
शिवोस्म्यहम्
प्रातःप्रभृतिसायान्तं सायादि प्रातरन्ततः
यत्करोमि जगन्नाथ तदस्तु तव पूजनम्॥
भैरवानुज्ञा - अतिक्रूर महाकाय कल्पान्त
दहनोपम। भैरवाय नमस्तुभ्यं अनुज्ञां

दातुमर्हसि ॥

आसन महामन्त्रस्य,पृथिव्या मेरु पृष्ठ ऋषिः ।

सुतलं चन्दः । कूर्मो देवता ।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।

त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

इति आसने उपविश्य ।

आचमनम्

ओं ह्वीं हौं नमः शिवाय, आत्म तत्वाय नमः

स्थूलदेहं परिशोधयामि जुहोमि स्वाहा

ओं ह्वीं हौं नमः शिवाय, विद्या तत्वाय नमः

सूक्ष्मदेहं परिशोधयामि जुहोमि स्वाहा

ओं ह्वीं हौं नमः शिवाय, शिव तत्वाय नमः





कारणदेहं परिशोधयामि जुहोमि स्वाहा

ओं ह्वीं हौं नमः शिवाय, सर्व तत्वाय नमः

सर्वदेहं परिशोधयामि जुहोमि स्वाहा

शुक्लाम्बरधरं विष्णुं शशिवर्णं ..... शान्तये ।

साम्बपरमेश्वरमूलमन्त्रेण प्राणायामं कुर्यात् ।

सङ्कल्पः- ममोपात्त समस्त दुरितक्षयद्वारा श्री

परमेश्वर प्रीत्यर्थं शुभे शोभने मुहूर्ते आद्य

ब्रह्मणः द्वितीय परार्धे श्वेत वराह कल्पे वैवस्वत

मन्वन्तरे अष्टाविंशति तमे कलियुगे प्रथमे पादे

जम्बूद्वीपे भारत वर्षे भरत खण्डे मेरोः दक्षिणे

पार्श्वे शकाब्दे अस्मिन् वर्तमाने व्यावहारिके

प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये ___नाम

संवत्सरे___अयने_ ऋतौ_मासे_ पक्षे_

शुभतिथौ__ वासरयुक्तायं___ नक्षत्रयुक्तायां

शुभ योग शुभ करण युक्तायां सकल विशेषण

विशिष्टायां __तिथौ

आदिगुरोः परशिवस्य आज्ञया प्रवर्तमान

देवीमानेन षट्त्रिंशत् तत्त्वात्मक सकल प्रपञ्च

सृष्टि स्थिति सम्हार तिरोधान अनुग्रह कारिण्याः

श्रीपराशक्त्याः ऊर्ध्व भ्रूविभ्रमे खं सदशिव तत्व

युगे थं त्वक् तत्व परिवृतौ_ तत्व वर्षे__नित्या

मासे___तत्व दिवसे __ नाथ वासरे_दिन

नित्यातां __घटिकोदये__पक्षे___तिथि

नित्यायां श्री साम्बपरमेश्वर प्रसाद सिद्ध्यर्थं श्री





साम्बपरमेश्वर पूजां करिष्ये ॥

ओं स्वस्ति श्रीमत् परशिवानन्द नाथ

पादाद्यशेष गुरु पारम्पर्य क्रमेण

स्वगुरु नाथ पादाम्बुजं यावत् तावत् प्रणौमि ॥

इति स्वशिरसि अञ्जलिं आबध्य

आगमार्थं तु देवानां गमनार्थं च रक्षसाम् ।

कुर्यात् घण्टारवं तत्र देवताह्वान लाञ्छनम् ॥ इति

घण्टा रवं कृत्वा

रक्त द्वादश शक्ति युक्ताय द्वीप नाथाय नमः -

इति पुष्पाञ्जलिं आधाय

अस्मिन् क्षेत्रे द्वीपनाथाय निर्विघ्नं सिद्धि हेतवे ।

श्री शिवक्रम पूजार्थं अनुज्ञां दीयतां मयि ॥ इति प्रार्थ्य ।

कलश पूजा - आधारं संस्थाप्य ।

आधारे बिन्दु-त्रिकोण-वृत्त-चतुरश्र मण्डलं विलिख्य ।

श्री साम्बपरमेश्वर उदकुम्भ पात्राधार मण्डलाय नमः । इति अभ्यर्च्य

जलपूर्णं कुम्भं निधाय । गन्ध पुष्पाक्षतैः अभ्यर्चयेत् ।

कलशस्य - मुखे विष्णवे नमः । कण्ठे रुद्राय नमः । मूले ब्रह्मणे नमः ।

मध्ये मातृगणेभ्यो नमः । कुक्षौ सप्तसागरेभ्यो



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

नमः । ऋग्वेदाय नमः ।

यजुर्वेदाय नमः । सामवेदाय नमः ।

अथर्वणवेदाय नमः । गङ्गायै नमः ।

यमुनायै नमः । गोदावर्यै नमः । सरस्वत्यै नमः । नर्मदायै नमः ।

सिन्धवे नमः । कावेर्यै नमः । गङ्गादि कोटि तीर्थेभ्यो नमः ।

इत्यभ्यर्च्य अनभिदाय स्पृष्ट्वा जपेत्

कलशस्य मुखे विष्णुः कण्ठे रुद्रस्समाश्रिताः ।

मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागरास्सर्वे सप्त द्वीपा वसुन्धरा ।

ऋग्वेदोऽथ यजुर्वेदस्सामवेदोऽप्यथर्वणः ॥

अङ्गैश्च सहितास्सर्वे  कलशाम्बु समाश्रिताः ।

आयान्तु देव पूजार्थं दुरितक्षय कारकाः ॥

गङ्गे च यमुने ताम्रे गोदावरि सरस्वति ।

नर्मदे सिन्धु कावेरि तीर्थेऽस्मिन् सन्निधिं कुरु ॥

आपो वा इदꣳ सर्वं विश्वाभूतान्यापः प्राणा वा

आपः पशव आपो

ऽन्नमापोऽमृतमापस्संराडपोविराडापस्स्वराडाप

श्चन्दाꣳस्यापोज्योतीꣳष्यापोयजूꣳष्याप

स्सत्यमापस्सर्वादेवता आपोभूर्भुवस्सुवराप

ओम् ।  इति अभिमन्त्र्य ।

ओं ह्रीं ह्रौं नमः शिवाय । इति

साम्बपरमेश्वरमूलमन्त्रं अष्टवारं अभिमन्त्र्य ।





धेनु योनि मुद्रे प्रदर्श्य । आत्मानं पुजोपकरणानि

च प्रोक्ष्य । श्री गुरुं प्रार्थयेत् ।

श्री गुरो दक्षिणामुर्ते भक्तानुग्रहकारक ।

अनुज्ञां देहि भगवन् श्री शिव पूजनाय मे ॥

इति प्रार्थ्य

॥ अथ सद्योजात विधान पूजा ॥

॥ अथ शैव पीठ पूजा ॥

ह्रीं श्रीं मं मण्डूकाय नमः ।

ह्रीं श्रीं कां कलाग्नि रुद्राय नमः ।

ह्रीं श्रीं मूं मूलप्रकृत्यै नमः ।

ह्रीं श्रीं आं आधार शक्त्यै नमः ।

ह्रीं श्रीं कूं कूर्माय नमः ।

ह्रीं श्रीं अं अनन्ताय नमः।

ह्रीं श्रीं वं वराहाय नमः।

ह्रीं श्रीं पृं पृथिव्यै नमः।

एवं सर्वाऽधस्थारभ्य आतालादि सप्तपाताल

भावनया उपर्युपरि सम्पूज्य।

ह्रीं श्रीं सुं सुधार्णव समुद्राय नमः।

ह्रीं श्रीं रं रत्नद्वीपाय नमः।

ह्रीं श्रीं नं नन्दनोद्यानाय नमः।

ह्रीं श्रीं स्वं स्वर्णप्राकाराय नमः।

ह्रीं श्रीं कं कल्पवृक्षेभ्यो नमः।

ह्रीं श्रीं मां माणिक्यमण्डपाय नमः।

ह्रीं श्रीं स्वं स्वर्णवेदिकायै नमः।



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

ह्रीं श्रीं रं रत्नसिम्हासनाय नमः।

सिम्हासनस्य पादचतुष्टये स्ववामाग्रपादमारभ्य

संपूज्य।

ह्रीं श्रीं धं धर्माय नमः।

ह्रीं श्रीं ज्ञां ज्ञानाय नमः।

ह्रीं श्रीं वं वैराग्याय नमः।

ह्रीं श्रीं ऐं ऐश्वर्याय नमः।

इति वायव्यादि कोण चतुष्टये धर्मादि कोण

चतुष्टयं प्रादक्षिण्येन संपूज्य॥

स्वाग्रादि सिम्हासनस्य दिग्चतुष्टये प्रादक्षिण्येन।

ह्रीं श्रीं अं अधर्माय नमः।

ह्रीं श्रीं अं अज्ञानाय नमः।

ह्रीं श्रीं अं अवैराग्याय नमः।

ह्रीं श्रीं अं अनैश्वर्याय नमः।

सिम्हासन मध्ये।

ह्रीं श्रीं मां मायायै नमः।

ह्रीं श्रीं विं विद्यायै नमः।

ह्रीं श्रीं अं अनन्ताय नमः।

ह्रीं श्रीं पं पद्मायै नमः।

ह्रीं श्रीं आं आनन्द्मय कन्द्ाय नमः।

ह्रीं श्रीं सं संविन्नालाय नमः।

ह्रीं श्रीं प्रं प्रकृतिमय पत्रेभ्यो नमः।

ह्रीं श्रीं विं विकृतिमय केसरेभ्यो नमः।

ह्रीं श्रीं पञ्चाशद्वर्णबीजाढय सर्वतत्वस्वरूपायै





कर्णिकायै नमः।

ह्रीं श्रीं अं अर्कमण्डलाय नमः।

अर्ककलाभ्यो नमः।

ह्रीं श्रीं उं सोममण्डलाय नमः।

सोमकलाभ्यो नमः।

ह्रीं श्रीं मं वह्निमण्डलाय नमः।

वह्निकलाभ्यो नमः।

ह्रीं श्रीं सं प्रबोधात्मने सत्वाय नमः।

ह्रीं श्रीं रं प्रकृत्यात्मने रजसे नमः।

ह्रीं श्रीं तं मोहात्मने तमसे नमः।

ह्रीं श्रीं आं आत्मने नमः।

ह्रीं श्रीं अं अन्तरात्मने नमः।

ह्रीं श्रीं पं परमात्मने नमः।

ह्रीं श्रीं ह्रीं ज्ञानात्मने नमः।

स्वाग्रादि चतुर्दिक्षु मध्ये च प्रादक्षिण्येन।

ह्रीं श्रीं ह्रीं ज्ञानतत्वात्मने नमः।

ह्रीं श्रीं मां मायातत्वात्मने नमः।

ह्रीं श्रीं कं कलातत्वात्मने नमः।

ह्रीं श्रीं विं विद्यातत्वात्मने नमः।

ह्रीं श्रीं पं परतत्वात्मने नमः।

अष्टदल केसरेषु मध्ये च स्वाग्रादि प्रादक्षिण्येन

ह्रीं श्रीं वामायै नमः।

ह्रीं श्रीं ज्येष्ठायै नमः।

ह्रीं श्रीं रौद्र्यै नमः।





ह्रीं श्रीं काल्यै नमः।

ह्रीं श्रीं कलविकरिण्यै नमः।

ह्रीं श्रीं बलविकरिण्यै नमः।

ह्रीं श्रीं बलप्रमथिन्यै नमः।

ह्रीं श्रीं सर्वभूतदमनायै नमः।

ह्रीं श्रीं मनोन्मन्यै नमः। इति मध्यमान्तं संपूज्य।

ओं नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्ताय सांबपरमेश्वरस्य संयोगपीठात्मने नमः। इति संपूज्य - मूर्तिकल्पनादिकं कुर्यात्।

अथ आवाहनम्

आत्वावहन्तु हरयस्सचेतसः

श्वेतैरश्वैस्सहकेतुमद्भिः।

वाताजितैर्बलवद्भिर्मनोजवैरायाहिशीघ्रं मम

हव्याय शर्वोम् ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।

"भूर्भुवस्सुवरों" एह्येहि भगवन् आगच्छागच्छ

अस्मिन् लिङ्गे सांबपरमेश्वरं ध्यायामि।

आवाहयामि। आं सोहं प्राणान् प्रतिष्ठापयामि

नमः। आवाहितोभव इत्यादि आवाहनादि

षण्मुद्राः प्रदर्श्य

( आवाहितोभव - स्थापितोभव - सन्निहितोभव





- सन्निरुद्धोभव - सम्मुखीकृतोभव -

अवगुण्ठितोभव - सुप्रसन्नोभव )

ततः कलशानि ( पञ्चं एकं वा ) स्थापयित्वा

सद्योजातादि रुद्रान् पूजयेत्। तद्यथा।

मध्य कलशे - ॥ ऊर्ध्ववक्त्र-प्रतिपादकमन्त्रः॥

ईशानस्सर्वविद्यानामीश्वर स्सर्वभूतानां

ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्म शिवोमे अस्तु

सदाशिवों॥ भूर्भुवस्सुवरों। अस्मिन्

कलशामृते ईशान रुद्रं ध्यायामि। आवाहयामि,

आं सोहं प्राणान् प्रतिष्ठापयामि नमः॥

पूर्व कलशे - ॥ प्राग्वक्त्र-प्रतिपादकमन्त्रः॥

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नोरुद्रः

प्रचोदयात्॥ भूर्भुवस्सुवरों।

अस्मिन् कलशामृते तत्पुरुष रुद्रं ध्यायामि।

आवाहयामि।

आं सोऽहं प्राणान् प्रतिष्ठापयामि नमः॥

दक्षिण कलशे -॥ दक्षिणवक्त्र प्रतिपादकमन्त्रः॥

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यस्सर्वत

श्शर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥

भूर्भुवस्सुवरों। अस्मिन् कलशामृते अघोर रुद्रं

ध्यायामि। आवाहयामि।

आं सोहं प्राणान् प्रतिष्ठापयामि नमः॥

उत्तर कलशे - ॥ उत्तरवक्त्र-प्रतिपादकमन्त्रः॥

वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः





कालाय नमः कलविकरणाय नमो बलविकरणाय

नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो

मनोन्मनाय नमः॥ भूर्भुवस्सुवरों। अस्मिन्

कलशामृते वामदेव रुद्रं ध्यायामि।

आवाहयामि।

आं सोहं प्राणान् प्रतिष्ठापयामि नमः॥

पश्चिम कलशे -॥ पश्चिमवक्त्रप्रतिपादकमन्त्रः॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमः।

भवेभवेनातिभवे भजस्व मां भवोद्भवाय नमः।

भूर्भुवस्सुवरों। अस्मिन् कलशामृते सद्योजात

रुद्रं ध्यायामि। आवाहयामि।

आं सोहं प्राणान् प्रतिष्ठापयामि नमः॥

ईशानादि पञ्चब्रह्म रुद्रेभ्यो नमः गन्धं समर्पयामि। ईशानादि पञ्चब्रह्म रुद्रेभ्यो नमः पुष्पाणि समर्पयामि। ईशानादि पञ्चब्रह्म रुद्रेभ्यो नमः धूपं अघ्रापयामि। ईशानादि पञ्चब्रह्म रुद्रेभ्यो नमः दीपं सन्दर्शयामि। ईशानादि पञ्चब्रह्म रुद्रेभ्यो नमः फलं निवेदयामि। ईशानादि पञ्चब्रह्म रुद्रेभ्यो नमः समस्तोपचारान् समर्पयामि॥

"सद्योजातं प्रपद्यामि सद्योजाताय वै नमः" - आसनं समर्पयामि।

"भवे भवेनाति भवे भजस्व मां" - पादयोः पाद्यं





समर्पयामि।

"भवोद्भवाय नमः" - हस्तयोरर्घ्यं समर्पयामि।

"रुद्राय नमः" मुखे आचमनीयं समर्पयामि।

"वामदेवाय नमः" स्नानपयामि। अभिषेक काले

ॐ॥ आपोहिष्ठामयोभुवस्तान ऊर्जेदधातन।
महेरणाय चक्षसे। योवश्शिवतमोरसस्तस्य
भाजयते हनः। उशतीरिव मातरः। तस्मा
अरङ्गमामवो यस्यक्षयाय जिन्वथ।
आपो जनयथा च नः॥

ॐ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः
कश्यपो यास्विन्द्रः। अग्निं या गर्भं दधिरे
विरूपास्ता न आपश्शꣳ स्योना भवन्तु॥

यासाꣳ राजा वरुणो याति मध्ये सत्यानृते
अवपश्यं जनानाम्। मधुश्चुतश्शुचयो याः
पावकास्ता न आपश्शꣳ स्योना भवन्तु॥ यासां
देवा दिवि कृण्वन्ति भक्शं या अन्तरिक्शे बहुधा
भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न
आपश्शꣳ स्योना भवन्तु॥ शिवेन मा चक्षुषा
पश्यताऽऽपश्शिवया तनुवोप स्पृशत त्वचं मे।
सर्वाꣳ अग्नीꣳ रप्सुषदो हुवो वो मयि वर्चो
बलमोजो निधत्त॥

पवमानस्सुवर्जनः। पवित्रेण विचर्षणिः। यः
पोता स पुनातु मा। पुनन्तु मा देवजनाः।
पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः।





जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा।
शुक्रेण देवदीद्यत्। अग्ने क्रत्वा क्रतूꣳ रनु। यत्ते
पवित्रमर्चिषि। अग्ने विततमन्तरा। ब्रह्म तेन
पुनीमहे। उभाभ्यां देवसवितः। पवित्रेण सवेन
च। इदं ब्रह्म पुनीमहे। वैश्वदेवी पुनती
देव्यागात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः। तया
मदन्तः सधमाद्येषु। वयꣳ स्याम पतयो
रयीणाम्। वैश्वानरो रश्मिभिर्मा पुनातु। वातः
प्राणेनेषिरो मयो भूः। द्यावापृथिवी पयसा
पयोभिः। ऋतावरी यज्ञिये मा पुनीताम्।
बृहद्भिः सवितस्तृभिः। वर्षिष्ठैर्देवमन्मभिः। अग्ने
दक्षैः पुनाहि मा। येन देवा अपुनत। येनापो

दिव्यंकशः। तेन दिव्येन ब्रह्मणा। इदं ब्रम्ह
पुनीमहे। यः पावमानीरध्येति।
ऋषिभिस्सम्भृतꣳ रसम्। सर्वꣳ स
पूतमश्नाति। स्वदितं मातरिश्वना। पावमानीर्यो
अध्येति। ऋषिभिस्सम्भृतꣳ रसम्। तस्मै
सरस्वती दुहे। क्षीरꣳ सर्पिर्मधूदकम्॥
पावमानीस्स्वस्त्ययनीः। सुदुघाहि पयस्वतीः।
ऋषिभिस्सम्भृतो रसः। ब्राह्मणेष्वमृतꣳ हितम्।
पावमानीर्दिशन्तु नः। इमं लोकमथो अमुम्।
कामान्थ्समर्धयन्तु नः। देवीर्देवैः समाभृताः।
पावमानीस्स्वस्त्ययनीः। सुदुघाहि घृतश्चुतः।
ऋषिभिस्संभृतो रसः।





ब्राह्मणेष्वमृतꣳ हितम्। येन देवाः पवित्रेण।
आत्मानं पुनते सदा। तेन सहस्रधारेण।
पावमान्यः पुनन्तु मा। प्राजापत्यं पवित्रम्।
शतोध्यामꣳ हिरण्मयम्। तेन ब्रह्म विदो
वयम्। पूतं ब्रह्म पुनीमहे। इन्द्रस्सुनीती सहमा
पुनातु। सोमस्स्वस्त्या वरुणस्समीच्या। यमो
रजा प्रमृणाभिः पुनातु मा। जातवेदा
मोर्जयन्त्या पुनातु। भूर्भुवस्सुवः॥
॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो
वेन आवः। स बुध्निया उपमा अस्य
विष्ठास्सतश्च योनिमसतश्च विवः॥
॥ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम

शन्तमꣳहृदे। सर्वोह्येष रुद्रस्तस्मै रुद्राय नामे अस्तु॥

॥ सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्रस्सन्महो नमो नमः। विश्वं भूतं भुवनञ्चित्रं बहुधा जातञ्जायमानञ्च यत्। सर्वोह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥

॥ कया नश्चित्र आभुवदूती सदा वृधस्सखा। कया शचिष्ठया वृता॥

॥ आपो वा इदꣳ सर्वं विश्वाभुतान्यापः प्राणा वा आपः पशव आपोन्नमापो ऽमृतमापस्सम्राडा पोविराडापस्स्वरादापश्चन्दाꣳस्यापोज्योतीꣳष्या पोयजूꣳष्यापस्सत्यमापस्सर्वादेवता





आपोभूर्भुवस्सुवराप ओम्॥ इत्येतैःअभिषिच्य।

नमक प्रश्नस्य अग्निकाण्ड ऋषिः - विराट् छन्दः - शम्भुर्देवता।

चमक प्रश्नस्य परमेष्ठि ऋषिः - विराट् छन्दः - ईश्वरोदेवता। अभिषेके विनियोगः॥

श्रीरुद्र नमकचमकपुरुषसूक्तश्रीसूक्तादिना अभिषिच्य अनन्तरं

अद्भिस्तर्पयति

१ - भवं देवं तर्पयामि। २ - शर्वं देवं तर्पयामि। ३ - ईशानं देवं तर्पयामि। ४ - पशुपतिं देवं तर्पयामि। ५ - रुद्रं देवं तर्पयामि। ६ - उग्रं देवं तर्पयामि।

७ - भीमं देवं तर्पयामि। ८ - महान्तं देवं तर्पयामि॥ इति तर्पयित्वा

" रुद्राय नमः " - आचमनीयं समर्पयामि

" ज्येष्ठाय नमः " - वस्त्र यज्ञोपवीत उत्तरीयाणि समर्पयामि

" कालाय नमः " - गन्धं समर्पयामि

" कलविकरणाय नमः " - अक्षतान् समर्पयामि

" बलविकरणाय नमः " - पुष्पाणि समर्पयामि

१ - भवाय देवाय नमः। २ - शर्वाय देवाय नमः। ३ - ईशानाय देवाय नमः।

४ - पशुपतये देवाय नमः। ५ - रुद्राय देवाय नमः। ६ - उग्राय देवाय नमः।



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

७ - भीमाय देवाय नमः। ८ - महते देवाय नमः। १ - भवस्य देवस्य पत्न्यै नमः

२ - शर्वस्य देवस्य पत्न्यै नमः। ३ - ईशानस्य देवस्य पत्न्यै नमः। ४ - पशुपतेर्देवस्य पत्न्यै नमः। ५ - रुद्रस्य देवस्य पत्न्यै नमः।

६ - उग्रस्य देवस्य पत्न्यै नमः। ७ - भीमस्य देवस्य पत्न्यै नमः।८-महतो देवस्य पत्न्यै नमः।

शिवाष्टोत्तर नामावळिः॥

ॐ शिवाय नमः।

ॐ महेश्वराय नमः।

ॐ शंभवे नमः।

ॐ पिनाकिने नमः।

ॐ शशिशेखराय नमः।

ॐ वामदेवाय नमः।

ॐ विरूपाक्षाय नमः।

ॐ कपर्दिने नमः।

ॐ नीललोहिताय नमः।

ॐ शङ्कराय नमः॥ १० ॥

ॐ शूलपाणिने नमः।

ॐ खट्वाङ्गिने नमः।

ॐ विष्णुवल्लभाय नमः।

ॐ शिपिविष्टाय नमः।





ॐ अंबिकानाथाय नमः।

ॐ श्रीकण्ठाय नमः।

ॐ भक्तवत्सलाय नमः।

ॐ भवाय नमः।

ॐ शर्वाय नमः।

ॐ त्रिलोकेशाय नमः॥ २० ॥

ॐ शितिकण्ठाय नमः।

ॐ शिवाप्रियाय नमः।

ॐ उग्राय नमः।

ॐ कपर्दिने नमः।

ॐ कामारये नमः।

ॐ अन्धकासुरसूदनाय नमः।

ॐ गङ्गाधराय नमः ।

ॐ ललाटाक्षाय नमः ।

ॐ कालकालाय नमः ।

ॐ कृपानिधये नमः ॥ ३० ॥

ॐ भीमाय नमः ।

ॐ परशुहस्ताय नमः ।

ॐ मृगपाणये नमः ।

ॐ जटाधराय नमः ।

ॐ कैलासवासिने नमः ।

ॐ कवचिने नमः ।

ॐ कठोराय नमः ।

ॐ त्रिपुरान्तकाय नमः ।





ॐ वृषाङ्काय नमः ।

ॐ वृषभारूढाय नमः ॥ ४० ॥

ॐ भस्मोद्धूलित विग्रहाय नमः ।

ॐ सामप्रियाय नमः ।

ॐ स्वरमयाय नमः ।

ॐ त्रयीमूर्तये नमः ।

ॐ अनीश्वराय नमः ।

ॐ सर्वज्ञाय नमः ।

ॐ परमात्मने नमः ।

ॐ सोमसूर्याग्निलोचनाय नमः ।

ॐ हविषे नमः ।

ॐ यज्ञमयाय नमः ॥ ५० ॥

ॐ सोमाय नमः।

ॐ पञ्चवक्त्राय नमः।

ॐ सदाशिवाय नमः।

ॐ विश्वेश्वराय नमः।

ॐ वीरभद्राय नमः।

ॐ गणनाथाय नमः।

ॐ प्रजापतये नमः।

ॐ हिरण्यरेतसे नमः।

ॐ दुर्धर्षाय नमः।

ॐ गिरीशाय नमः॥ ६० ॥

ॐ गिरिशाय नमः।

ॐ अनघाय नमः।



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

ॐ भुजङ्गभूषणाय नमः।

ॐ भर्गाय नमः।

ॐ गिरिधन्वने नमः।

ॐ गिरिप्रियाय नमः।

ॐ कृत्तिवाससे नमः।

ॐ पुरारातये नमः।

ॐ भगवते नमः।

ॐ प्रमथाधिपाय नमः॥ ७० ॥

ॐ मृत्युञ्जयाय नमः।

ॐ सूक्ष्मतनवे नमः।

ॐ जगद्व्यापिने नमः।

ॐ जगद्गुरवे नमः।

ॐ व्योमकेशाय नमः।

ॐ महासेनजनकाय नमः।

ॐ चारुविक्रमाय नमः।

ॐ रुद्राय नमः।

ॐ भूतपतये नमः।

ॐ स्थाणवे नमः॥ ८० ॥

ॐ अहयेबुध्नियाय नमः।

ॐ दिगंबराय नमः।

ॐ अष्टमूर्तये नमः।

ॐ अनेकात्मने नमः।

ॐ सात्विकाय नमः।

ॐ शुद्धविग्रहाय नमः।



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

ॐ शाश्वताय नमः।

ॐ खण्डपरशवे नमः।

ॐ अजाय नमः।

ॐ पाशविमोचकाय नमः॥ ९० ॥

ॐ मृडाय नमः।

ॐ पशुपतये नमः।

ॐ देवाय नमः।

ॐ महादेवाय नमः।

ॐ अव्ययाय नमः।

ॐ हरये नमः।

ॐ पूषदन्तभिदे नमः।

ॐ अव्यग्राय नमः।

ॐ दक्षाध्वरहराय नमः ।

ॐ हराय नमः ।

ॐ भगनेत्रभिदे नमः ।

ॐ अव्यक्ताय नमः ।

ॐ सहस्राक्षाय नमः ॥ १०० ॥

ॐ सहस्रपदे नमः ।

ॐ अपवर्गप्रदाय नमः ।

ॐ अनन्ताय नमः ।

ॐ तारकाय नमः ।

ॐ परमेश्वराय नमः ॥ १०८ ॥

बलप्रमथनाय नमः - धूपं आघ्रापयामि

सर्वभुतदमनाय नमः - दीपं सन्दर्शयामि





मनोन्मनाय नमः - यथा भागानि निवेदयामि ।

ताम्बूलं समर्पयामि ।

" नमस्तेऽस्तु भगवन् विश्वेश्वराय महादेवाय

त्रयम्बकाय त्रिपुरान्तकाय त्रिकालाग्निकालाय

कालाग्निरुद्राय नीलकण्ठाय मृत्युन्जयाय

सर्वेश्वराय महादेवाय श्रीमन्महादेवाय नमः । "

॥ कर्पूर नीराजनं समर्पयामि ॥

" अघोरतनुरूपस्तिष्ठते "

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यस्सर्वतश्शर्व

सर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ इति

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नोरुद्रः

प्रचोदयात् ॥

इति रुद्रगायत्रीं दशवारं पठेत् ॥

ईशान स्सर्वविद्यानामीश्वर स्सर्वभुतानां

ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्म शिवोमे अस्तु

सदाशिवों ॥ इत्येवं आशिषमास्ते ।

ओं हरों यो ह वै रुद्रस्स भगवान् यश्च ब्रह्मा

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च

विष्णुर्भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ २ ॥



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

हरों यो ह वै रुद्रस्स भगवान् यश्च महेश्वरो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ३ ॥

हरों यो ह वै रुद्रस्स भगवान् या चोमा

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ४ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च विनायको

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ५ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च स्कन्दो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ६ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्चेन्द्रो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ७ ॥

हरों यो ह वै रुद्रस्स भगवान्

यश्चाग्निर्भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं

जनदों विश्वरूपोऽसि ॥ ८ ॥

हरों यो ह वै रुद्रस्स भगवान् या च

भूर्भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ९ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च भुवो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १० ॥





हरों यो ह वै रुद्रस्स भगवान् यश्च सुवो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ११ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च महो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १२ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च जनो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १३ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च तपो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १४ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च सत्यं

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १५ ॥

हरों यो ह वै रुद्रस्स भगवान् या च पृथिवी

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १६ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्चापो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १७ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च तेजो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १८ ॥





हरों यो ह वै रुद्रस्स भगवान् यश्च

वायुर्भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ १९ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्चाकाशं

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ २० ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च सूर्यो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ २१ ॥

हरों यो ह वै रुद्रस्स भगवान् यश्च सोमो

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ २२ ॥

हरों यो ह वै रुद्रस्स भगवान् यानि च नक्षत्राणि
भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों
विश्वरूपोऽसि ॥ २३ ॥
हरों यो ह वै रुद्रस्स भगवान् ये चाष्टौ ग्रहा
भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों
विश्वरूपोऽसि ॥ २४ ॥
हरों यो ह वै रुद्रस्स भगवान् यश्च प्राणो
भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों
विश्वरूपोऽसि ॥ २५ ॥
हरों यो ह वै रुद्रस्स भगवान् यश्च कालो
भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों
विश्वरूपोऽसि ॥ २६ ॥





हरों यो ह वै रुद्रस्स भगवान् यश्च यमो
भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों
विश्वरूपोऽसि ॥ २७ ॥
हरों यो ह वै रुद्रस्स भगवान् यश्च
मृत्युर्भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों
विश्वरूपोऽसि ॥ २८ ॥
हरों यो ह वै रुद्रस्स भगवान् यच्चामृतं
भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों
विश्वरूपोऽसि ॥ २९ ॥
हरों यो ह वै रुद्रस्स भगवान् यच्च भूतं भव्यं
भविष्यत् भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं
जनदों विश्वरूपोऽसि ॥ ३० ॥

हरों यो ह वै रुद्रस्स भगवान् यच्च विश्वं

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ३१ ॥

हरों यो ह वै रुद्रस्स भगवान् यच्च कृत्स्नं

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ३२ ॥

हरों यो ह वै रुद्रस्स भगवान् यच्च सर्वं

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ३३ ॥

हरों यो ह वै रुद्रस्स भगवान् यच्च सत्यं

भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों

विश्वरूपोऽसि ॥ ३४ ॥



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति

तस्मै । त्वꣳहि वेत्थ आत्मबुद्धिप्रकाशं मुमुक्षुर्वै

शरणमहं प्रपद्ये ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।

तस्य प्रकृति लीनस्य यः परस्स महेश्वरः ॥

इति च स्तुत्वा प्रदक्षिण नमस्कारान् कुर्यात् ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान्

भवति । चन्द्रमा व अपां पुष्पं । पुष्पवान्

प्रजावान् पशुमान् भवति । य एवं वेद । योऽपां

आयतनं वेद । आयतनवान् भवति ।

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।

तस्य प्रकृति लीनस्य यः परस्स महेश्वरः ॥

साङ्गाय सायुधाय सपरिवाराय सर्वात्मकाय

श्री सांबपरमेश्वराय नमः ।

वेदोक्त मन्त्र पुष्पाञ्जलिं समर्पयामि ॥

नमस्कारः

शिवं शिवतरं शन्तं शिवात्मानं शिवोत्तमं ।

शिव मार्ग प्रणीतारं प्रणतोस्मि सदा शिवों ।

महादेवं महेशानं महेश्वर उमापतिं ।

महासेन गुरुं वन्दे महाभय निवारणं ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।

तस्मात् कारुण्य भावेन रक्ष रक्ष महेश्वर ॥

मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ।



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

अमृतेशाय शर्वाय महादेवाय ते नमः ॥

नन्दिकेश्वर पूजा

तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि । तन्नो

नन्दिः प्रचोदयात् ॥ नन्दिकेश्वराय नमः -

शिवाऽभिषेक जलेन स्नपयामि । शिवनिर्माल्य

पुष्पं समर्पयामि ।

धूपं आघ्रापयामि । दीपं सन्दर्शयामि ।

शिवप्रसादं निवेदयामि । समस्तोपचारान्

समर्पयामि ॥

बलिदानम् - बाण रावण चण्डेश नन्दि

भृङ्गिरिटादयः । महादेव प्रसादोऽयं सर्वे गृह्णन्तु

शाम्बवाः ॥ इति बलिं दद्यात् ॥ पुनः उत्तरे -

चण्डेश्वराय नमः शिवनिर्माल्यं समर्पयामि ॥

इति किञ्चित् निर्माल्यं विसृजेत् ॥

नीलकण्ठ पदाम्भोज परिफुरित मानस ।
शम्भोः सेवाफलं देहि चण्डिकेश नमोऽस्तुते ॥
अनायासेन मरणं विना धैन्येन जीवनं ।
देहि मेकृपया शम्भो त्वयि भक्तिमचञ्चलाम् ॥
देवनाथ गुरो स्वामिन् देशिक स्वात्म नायक ।
त्राहि त्राहि कृपा सिन्धो पूजां पुर्णतरां कुरु ॥

ॐ हर ॐ हर ॐ हर

॥ शिवमस्तु ॥

॥ मन्त्र पुष्पम् ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान्



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

भवति । चन्द्रमा व अपां पुष्पं । पुष्पवान् प्रजावान् पशुमान् भवति । य एवं वेद । योऽपां आयतनं वेद । आयतनवान् भवति ।
अग्निर्वा अपामायतनं । आयतनवान् भवति ।
योऽग्नेरायतनं वेद । आयतनवान् भवति । आपोवा अग्नेरायतनं । आयतनवान् भवति । य एवं वेद ।
योऽपां आयतनं वेद । आयतनवान् भवति ।
वायुर्वा अपामायतनं । आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति । आपो वै वायोरायतनं । आयतनवान् भवति । य एवं वेद । योऽपां आयतनं वेद । आयतनवान् भवति ।

असौ वै तपन्नपामायतनं। आयतनवान् भवति।
योऽमुष्य तपत आयतनं वेद। आयतनवान्
भवति। आपो वा अमुष्य तपत आयतनं।
आयतनवान् भवति। य एवं वेद। योऽपां
आयतनं वेद। आयतनवान् भवति।
चन्द्रमा वा अपामायतनं। आयतनवान् भवति।
यश्चन्द्रमस आयतनं वेद। आयतनवान् भवति।
आपो वै चन्द्रमस आयतनं। आयतनवान्
भवति। य एवं वेद। योऽपां आयतनं वेद।
आयतनवान् भवति।
नक्षत्राणि वा अपामायतनं। आयतनवान्
भवति। यो नक्षत्राणाम् आयतनं वेद।



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

आयतनवान् भवति। आपो वै
नक्षत्राणामायतनमायतनं। आयतनवान् भवति।
य एवं वेद। योऽपां आयतनं वेद।
आयतनवान् भवति।
पर्जन्यो वा अपामायतनं। आयतनवान् भवति।
यः पर्जन्यस्यायतनं वेद। आयतनवान् भवति।
आपो वै पर्जन्यस्यायतनं। आयतनवान्
भवति। य एवं वेद। योऽपां आयतनं वेद।
आयतनवान् भवति।
संवत्सरो वा अपामायतनं। आयतनवान्
भवति। यस्सम्वत्सरस्यायतनं वेद। आयतनवान्
भवति। आपो वै संवत्सरस्यायतनं।

आयतनवान् भवति । य एवं वेद । योऽप्सुनावं

प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ।

ॐ तद् ब्रह्मा ॐ तद् वायुः ॐ तदात्मा ॐ तत्

सत्यम् ॐ तत् सर्वम् ॐ तत् पुरसेर्नमः ।

अन्तश्चरति भूतेषु गुहायाम् विश्व मूर्तिषु ।

त्वम् यज्ञस्त्वम् वषट्कारस्त्वम् इन्द्रस्त्वम्

रुद्रस्त्वम् विष्णुस्त्वम् ब्रह्मा त्वम् प्रजापतिः ।

त्वम् तदाप आपोज्योती रसोऽमृतम् ब्रह्म

भूर्भुवस्सुवरोम् ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्त्व

मानशुः ।

परेण नाकम् निहितम् गुहायाम्



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

विभ्राजदेतद्विषयो विशन्ती ॥

वेदान्त विज्ञान

सुनिश्चिदाथास्सन्यासयोगद्यतयश्शुद्ध सत्त्वाः ।

ते ब्रह्म लोके तु परान्त काले परामृतात्

परिमुच्यन्ति सर्वे ॥ दह्रम् विपापम् परमेश्म

भूतम् यत्पुण्दरीकम् पुरमद्ध्यसꣳस्थं ।

तत्रापि दह्रम् गगनं विशोकस्तस्मिन्

यदन्तस्तदुपासितव्यं ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।

तस्य प्रकृति लीनस्य यः परस्स महेश्वरः ॥

श्री साम्बसदाशिवाय नमः ॥

॥ श्री रुद्रप्रश्नः ॥

॥ ॐ नमो भगवते रुद्राय ॥

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥
या त इषुः शिवतमा शिवम् बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शन्तमया
गिरिशन्ताभिचाकशीहि ॥





यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं
जगत् ॥
शिवेन वचसा त्वा गिरिशाच्छावदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥
असौ यस्तम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमाꣳ रुद्रा अभितो दिक्षु श्रिताः
सहस्रशोऽवैषाꣳ हेड ईमहे ॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ॥

उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ।
प्रमुञ्च धन्वनस्त्व-मुभयोरार्त्नियोर्ज्याम् ॥
याश्च ते हस्त इषवः परा ता भगवो वप ।
अवतत्य धनुस्तवꣳ सहस्राक्श शतेषुधे ॥
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ॥
अनेशन्नस्येषव आभुरस्य निषङ्गथिः ।
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ॥
तयाऽस्मान् विश्वतस्त्वमयक्श्मया परिब्भुज ।
नमस्ते अस्त्वायुधायानातताय धृष्णवे ॥





उभाभ्यामुत ते नमो बाहुभ्याम् तव धन्वने ।
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥१
नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो
नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो
नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो
नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो
नमो हरिकेशयोपवीतिने पुष्टाणं पतये नमो नमो
भवस्य हेत्यै जगतां पतये नमो नमो
रुद्रायाततताविने क्शेत्राणां पतये नमो
नमस्सूतायाहन्त्याय वनानां पतये नमो नमो
रोहिताय स्थपतये वृक्शाणं पतये नमो नमो

मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो
भुवंतये वारिवस्कृधायौषधीनां पतये नमो
नम उच्चैर्घोषायाक्रन्दयते पत्तीनाम् पतये नमो
नमः कृत्स्नवीताय धावते सत्वनां पतये
नमः ॥२॥
नमः सहमानाय निव्यादिन आव्याधिनीनां पतये
नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये
नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये
नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो
नमो निचेरवे परिचरायारण्यानां पतये नमो नमः
सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो
नमोऽसिमद्भ्यो नक्तंचरद्भ्यः प्रकृन्तानां पतये





नमो नम उष्णीषिने गिरिचराय कुलुञ्चानां पतये
नमो नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम
आतन्वानेभ्य प्रतिदधानेभ्यश्च वो नमो नम
आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो
नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम
आसीनेभ्यः शयानेभ्यश्च वो नमो नमः
स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो
धावद्भ्यश्च वो नमो नमः सभाभ्यः
सभापतिभ्यश्च वो नमो नमो
अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥४॥
नम आव्यधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो
नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो

गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो
व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो
गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो
विश्वरुपेभ्यश्च वो नमो नमो महद्भ्यः
क्शुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च
वो नमो नमो रथेभ्यो रथपतिभ्यश्च वो नमो नमः
सेनाभ्यः सेननिभ्यश्च वो नमो नमः क्शत्तृभ्यः
संग्रहीतृभ्यश्च वो नमो नमस्तक्शभ्यो
रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः
कमारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो
निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो
धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च





वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो
नमः ॥४ ॥
नमो भवाय च रुद्राय च नमः शर्वाय च
पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय
च नमः कपर्दिने च व्युप्तकेशाय च नमः
सहस्राक्शाय च शतधन्वने च नमो गिरिशाय च
शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो
ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे
च नमो वृद्धाय च संवृद्वने च नमो अग्रियाय च
प्रथमाय च नम आशवे चाजिराय च नमः
शीघ्रियाय च शीभ्याय च
नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय

च द्वीप्याय च ॥५॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय
चापरजाय चनमो मध्यमाय चापगल्भाय च
नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च
प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम
उर्वर्याय च खल्याय च नमः श्लोक्याय
चाऽवसान्याय च नमो वन्याय च कक्ष्याय च
नमः श्रवाय च प्रतिश्रवाय च
नम आशुषेणाय चाशुरथाय च नमः शूराय
चावभिन्दते च नमो वर्मिणे च वरूथिने च
नमो बिल्मिने च कवचिने च नमः श्रुताय च
श्रुतसेनाय च ॥ ६ ॥





नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च
प्रमृशाय च नमो दूताय च प्रहिताय च नमो
निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे
चायुधिने च नमः स्वायुधाय च सुधन्वने च
नमः स्रुत्याय च पथ्याय च नमः काट्याय च
नीप्याय च नमः सूद्याय च सरस्याय च नमो
नाद्याय च वैशन्ताय च नमः कूप्याय चावट्याय
च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च
विद्युत्याय च नम ईध्रियाय चातप्याय च नमो
वात्याय च रेष्मियाय च नमो वास्तव्याय च
वास्तुपाय च॥ ७ ॥

नमः सोमाय च रुद्राय च नमस्ताम्राय
चारुणाय च नमः शङ्गाय च पशुपतये च नम
उग्राय च भीमाय च नमो अग्रेवधाय च
दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो
वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे
च मयोभवे च नमः शंकराय च मयस्कराय च
नमः शिवाय  च शिवतराय च नमस्तीर्थ्याय च
कूल्याय च नमः पार्याय चावार्याय च नमः
प्रतरणाय चोत्तरणाय च नम आतार्याय
चालाद्याय च नमः शष्प्याय च फेन्याय च नमः
सिकत्याय च प्रवाह्याय च ॥ ८ ॥
नम इरिण्याय च प्रपथ्याय च नमः किꣳशिलाय





च क्षयणाय च नमः कपर्दिने च पुलस्तये च
नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च
गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो
ह्रदय्याय च निवेष्प्याय च नमः पाꣳसव्याय च
रजस्याय च नमः शुष्क्याय च हरित्याय च
नमो लोप्याय चोलप्याय च नम ऊर्व्याय च
सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च
नमोऽपगुरमाणाय चाभिघ्नते च नम आखिदते
च प्रखिदते च नमो वः किरिकेभ्यो देवानाꣳ
हृदयेभ्यो नमो विक्षीणकेभ्यो देवानाꣳहृदयेभ्यो
नमो विचिन्वत्केभ्यो देवानाꣳ हृदयेभ्यो नम
आनिर्हतेभ्यो देवानाꣳ हृदयेभ्यो नम

आमीवत्केभ्यो देवाना॑ँ हृदयेभ्यः ॥ ९ ॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित । एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचनाममत् ॥ १०-१ ॥

या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥१०-२ ॥

इमा॑ँ रुद्राय तवसे कपर्दिने क्शयद्वीराय प्रभरामहे मतिम् ॥ यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ १०-३ ॥

मृडा नो रुद्रोत नो मयस्कृधि क्शयद्वीराय नमसा



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥ १०-४ ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्शन्त-मुत मा न उक्शितम् । मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥ १०-५ ॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते ॥ १०-६ ॥

आरात्ते गोघ्न उत पूरुषघ्ने क्शयद्वीराय सुम्नमस्मे ते अस्तु । रक्शा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥ १०-७ ॥

स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीम-
मुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो
अन्यन्ते अस्मन्निवपन्तु सेनाः ॥ १०-८ ॥
परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य
दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृडय ॥ १०-९ ॥
मीढुष्टम शिवतम शिवो नः सुमना भव । परमे
वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं
बिभ्रदागहि ॥ १०-१० ॥
विकिरिद् विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोन्यमस्मन्निवपन्तु ताः ॥
१०-११ ॥





सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥
१०-१२ ॥
सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥ ११-१ ॥
अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥ ११-२ ॥
नीलग्रीवाः शितिकण्ठाः शर्वा अधः
क्षमाचराः ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥ ११-३ ॥
नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥११-४ ॥

ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥११-५ ॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥ ११-६ ॥
ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥११-७ ॥
ये पथां पथिरक्शय ऐलबृदा यव्युधः ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥ ११-८ ॥
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ॥ ११-९ ॥
य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे
तेषाꣳ सहस्र-योजनेऽवधन्वानि तन्मसि ॥ ११-





१० ॥
नमो रुद्रेभ्यो ये पृथिव्यां येषामन्नं मिषवस्तेभ्यो
दश प्राचीर्दश दक्शिणा दश प्रतीचीर्दशोदीची
र्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥ ११-११ ॥
नमो रुद्रेभ्यो येऽन्तरिक्षे येषां वातो इषवस्तेभ्यो
दश प्राचीर्दश छक्षिणा दश प्रतीचीर्दशोदीची
र्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥ ११-१२ ॥
नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश
प्राचीर्दश दक्षिणा दशप्रतीचीर्दशोदीची
र्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो

यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥ ११-१३ ॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्यो-र्मुक्षीय
माऽमृतात् ॥ १ ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो
विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो
अस्तु ॥ २ ॥

तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति
भेषजस्य । यक्ष्वामहे सौमनसाय रुद्रं
नमोभिर्देवमसुरं दुवस्य ॥ ३ ॥

अयं मे हस्तो भगवानयं मे भगवत्तरः । अयं मे
विश्वभेषजोऽयꣳ शिवाभिमर्शनः ॥ ४ ॥





ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।
तान् यज्ञस्य मायया सर्वानव यजामहे । मृत्यवे
स्वाहा मृत्यवे स्वाहा ॥ ५ ॥

ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ।
प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः ।
तेनान्नेनाप्यायस्व ॥ ६ ॥

नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ चमकप्रश्नः ॥

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः ।
द्युम्नैर्वाजेभिरागतम् ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे

धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे
श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे
प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं
च म आधीतं च मे वाक्च मे मनश्च मे चक्शुश्च
मे श्रोत्रं च मे दक्शश्च मे बलं च म ओजश्च मे
सहश्च म आयुश्च मे जरा च म आत्मा च मे
तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च
मेऽस्थानि च मे परूꣳषि च मे शरीराणि च
मे ॥ १ ॥
ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च
मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे
वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया





च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च
मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे
क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं
च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च
मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म
ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे
मतिश्च मे सुमतिश्च मे ॥ २ ॥
शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे
कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे
वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे
यन्ता च मे धर्ता च मे क्शेमश्च मे धृतिश्च मे
विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च

मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च
मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे
जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं
च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं
च मे ॥ ३ ॥

ऊर्क् मे सूनृता च मे पयश्च मे रसश्च मे घृतं च
मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे
वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे
रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च
मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च
मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे
व्रीहियश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे





मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे
प्रियंगवश्च मेऽणवश्च मे श्यामकाश्च मे
नीवाराश्च मे ॥ ४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च
मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च
मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे
लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म
ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे
ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां
वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु
च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म
एमश्च म इतिश्च मे गतिश्च मे ॥ ५ ॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे
सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च
मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे
मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा
च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च
म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च
म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी
च म इन्द्रश्च मेऽन्तरिक्शं च म इन्द्रश्च मे
द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च
म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ६ ॥
अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म
उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायश्च मे





मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे
शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च
मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च
मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवाश्च मे
मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे
सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे
पात्नीवतश्च मे हारियोजनश्च मे ॥ ७ ॥
इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे
स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म
उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे
वायव्यानि च मे पूतभृच्च म आधवनीयश्च म
आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे

पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे
स्वगाकारश्च मे ॥ ८ ॥
अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च
मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च
मे द्यौश्च मे  शक्क्वरीरङ्गुलयो दिशश्च मे यज्ञेन
कल्पन्तामृक्क मे साम च मे स्तोमश्च मे यजुश्च
मे दीक्शा च मे तपश्च म ऋतुश्च मे व्रतं च
मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन
कल्पेताम् ॥ ९ ॥
गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे
दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे
पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे





तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही
च म उक्शा च मे वशा च म ऋषभश्च मे वेहच्च
मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां
प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो
यज्ञेन कल्पतां चक्शुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन
कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन
कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन
कल्पताम् ॥ १० ॥
एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव
च म एकादश च मे त्रयोदश च मे पञ्चदश च
मे सप्तदश च मे नवदश च म एकविꣳशतिश्च
मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे

सप्तविꣳशतिश्च मे नवविꣳशतिश्च म
एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे चतस्रश्च मेऽष्टौ
च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे
चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च
मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे
चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे
वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च
व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च
भुवनश्चाधिपतिश्च ॥ ११ ॥
ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि
शꣳसिषद्विश्वेदेवाः सूक्तवाचः पृथिवीमातर्मा मा
हिꣳसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि





मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ
शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु
शोभायै पितरोऽनुमदन्तु ॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ इति श्री कृष्णयजुर्वेदीय तैत्तिरीय संहितायां
चतुर्थकाण्डे सप्तमः प्रपाठकः ॥

॥ पुरुषसूक्तम् ॥

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ।
पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति ।
एतावानस्य महिमा । अतो ज्यायाꣳश्च पूरुषः ।

पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि।
त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभवात्पुनः।
ततो विष्वङ्व्यक्रामत्। साशनानशने अभि।
तस्माद्विराडजायत। विराजो अधि पूरुषः।
स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः।
यत्पुरुषेण हविषा। देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्यम्। ग्रीष्म
इध्मश्शरद्धविः। सप्तास्यासन्परिधयः। त्रिः सप्त
समिधः कृताः। देवा यद्यज्ञं तन्वानाः।
अबध्नन्पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्।
पुरुषं जातमग्रतः। तेन देवा अयजन्त। साध्या
ऋषयश्च ये। तस्माद्यज्ञात्सर्वहुतः। संभृतं





पृषदाज्यम्। पशूꣳस्ताꣳश्चक्रे वायव्यान्।
आरण्यान्ग्राम्याश्च ये। तस्माद्यज्ञात्सर्वहुतः।
ऋचः सामानि जज्ञिरे। छन्दाꣳसि जज्ञिरे
तस्मात्। यजुस्तस्मादजायत। तस्मादश्वा
अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे
तस्मात्। तस्माज्जाता अजावयः। यत्पुरुषं
व्यदधुः। कतिधा व्यकल्पयन्।
मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते।
ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः। पद्भ्याꣳ शूद्रो अजायत।
चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत।

नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकाꣳ अकल्पयन्। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन्यदास्ते। धाता पुरस्ता द्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः॥





॥ उत्तरनारायणम्॥

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेयऽनाय। प्रजापतिश्चरति गर्भे अन्तः। अजायमनो बहुधा विजायते। तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेदसः॥ यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मम् जनयन्तः। देवा अग्रे

तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा
असन् वशे। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ।
अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ
व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण।
सर्वं मनिषाण॥

॥ अथ श्री सूक्तम्॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥
१॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ २॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्।





श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥ ३॥
कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां
तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥ ४॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके
देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां
त्वां वृणे॥ ५॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव
वृक्षोऽथ बिल्वः।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या
अलक्ष्मीः॥ ६॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे ॥
७ ॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥ ८ ॥
गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥
१० ॥
कर्दमेन प्रजाभूतामयि सम्भवकर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

११ ॥
आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे ।
निचदेवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
१३ ॥
आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
१४ ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योऽश्वान्विन्देयं
पुरुषानहम् ॥ १५ ॥

या लक्ष्मी सिन्धु सम्भवा भूति धेनु पुरो वसुः।
पद्मा विश्वा वसुर्देवी सदा नो जुषतं गृहम्॥
१६॥
पद्मानने पद्म ऊरू पद्माक्षी पद्मसम्भवे।
तन्मेभजसि पद्माक्षी येन सौख्यं लभाम्यहम्॥
१७॥
अश्वदायी गोदायी धनदायी महाधने।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे॥ १८॥
भद्रं नो अपिवातय मनाः मरुतामोझसे स्वाहा।
इन्द्रो विश्वस्य राजति शन्नो भवद्विपदे शं
चतुष्पदे॥ १९॥

॥ नारायण सूक्तम्॥



श्रीबोधायनोक्त महान्यास सहित शिवपूजा

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवं।
विश्वं नारायणं देवमक्षरं परमं पदम्।
विश्वतः परमान्नित्यं विश्वं नारायण॒ँ हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति।
पतिं विश्वस्यात्मेश्वर॒ँ शाश्वत॒ँ शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्।
नारायणपरो ज्योतिरात्मा नारायणः परः।
नारायण परं ब्रह्म तत्वं नारायणः परः।
नारायणपरो ध्याता ध्यानम् नारायणः परः।
यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा॥
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः।
अनन्तमव्ययं कवि॒ँ समुद्रेऽन्तं विश्वशम्भुवम्।

पद्मकोश प्रतीकाशꣳ हृदयं चाप्यधोमुखम् ।
अधो निष्ट्या वितस्यान्ते नाभ्यामुपरि तिष्ठति ।
ज्वालमालाकुलं भाति विश्वस्यायतनं महत् ।
सन्ततꣳ शिलाभिस्तुलम्बत्याकोशसन्निभम् ।
तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महनग्निर्विश्वार्चिर्विश्वतोमुखः ।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ।
तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता ।
सन्तापयति स्वं देहमापादतलमस्तकः ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः ।
नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।





नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा ।
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥
ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ।
ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ।

॥ अथ दुर्गा सूक्तम् ॥

ॐ जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥ १ ॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु
जुष्टाम्। दुर्गां देविꣳ शरणमहं प्रपद्ये सुतरसि
तरसे नमः॥ २॥
अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति
दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा
तोकाय तनयाय शंयोः॥ ३॥
विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा
दुरिताऽतिपर्षि। अग्ने अत्रिवन्मनसा
गृणानोऽस्माकं बोध्यविता तनूनाम्॥ ४॥
पृतना जितꣳ सहमानमुग्रमग्निꣳ हुवेम
परमात्सधस्थात्। स नः पर्षदति दुर्गाणि विश्वा
क्षामद्देवो अति दुरितात्यग्निः॥ ५॥





प्रत्नोषिकमीड्यो अध्वरेषु सनाच्च होता नव्यश्च
सत्सि। स्वाञ्चाग्ने तनुवं पिप्रयस्वास्मभ्यं च
सौभगमायजस्व॥ ६॥
गोभिर्जुष्टमयुजो निषिक्तन्तवेन्द्र
विष्णोरनुसंचरेम। नाकस्य पृष्ठमभि संवसानो
वैष्णवीं लोक इह मादयन्ताम्॥ ७॥
ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि।
तन्नो दुर्गिः प्रचोदयात्॥

॥ शिवोपासन मन्त्राः॥

निधनपतये नमः। निधनपतान्तिकाय नमः।
ऊर्ध्वाय नमः। ऊर्ध्वलिङ्गाय नमः। हिरण्याय
नमः। हिरण्यलिङ्गाय नमः। सुवर्णाय नमः।

सुवर्णलिङ्गाय नमः। दिव्याय नमः।
दिव्यलिङ्गाय नमः। भवाय नमः। भवलिङ्गाय
नमः। शर्वाय नमः। शर्वलिङ्गाय नमः।
शिवाय नमः। शिवलिङ्गाय नमः। ज्वलाय
नमः। ज्वललिङ्गाय नमः। आत्माय नमः।
आत्मलिङ्गाय नमः। परमाय नमः।
परमलिङ्गाय नमः। एतत्सोमस्य सुर्यस्य
सर्वलिङ्गꣳ स्थापयति पाणिमन्त्रं पवित्रम्।
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः।
भवेभवेनातिभवे भजस्व मां भवोद्भवाय नमः॥
वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः
कालाय नमः कलविकरणाय नमो बलविकरणाय





नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो
मनोन्मनाय नमः॥
अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यस्सर्वत
श्शर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥
तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नोरुद्रः
प्रचोदयात्॥
ईशान स्सर्वविद्यानामीश्वर स्सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवोमे अस्तु
सदाशिवों॥

॥ नमस्कार मन्त्राः॥

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय
हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये

नमो॒ नमः॑ ॥

॥ शिवमस्तु ॥